विद्युद्दूतः

vidyud-dūtaḥ

क्रमाङ्कः दशमः

Issue: Tenth

वसुधैव कुटुम्बकम्
INTERNATIONAL ASSOCIATION OF SANSKRIT STUDIES
अन्ताराष्ट्रियसंस्कृताध्ययनसमवायः

२६/७/२०१४

26/7/2014

# हानस्मृतिः

## १२/७/२०१४- दिनाङ्के दिवङ्गताय श्रीमिखाएलहानवर्याय समर्पितः सटिप्पणः श्लोकाञ्जलिः

राधावल्लभः त्रिपाठी

ज्ञात्वा शोककरीं विपत्तिमहहा हानस्य, वाग्देवता
वीणावादनतो विरम्य सहसा जोषं विषण्णा स्थिता ।
स्तब्धं संस्कृतविश्वमद्य रहितं विद्वद्वरेण्यादिदं
पङ्के गौरिव सीदति प्रतिहतं दुःखोपघातान्मुहुः ।।१।।

टि. – विपत्तिः निधनम् । वाग्देवता सरस्वती । संस्कृतविश्वं संस्कृतविदुषां समाजः । विद्वद्वरेण्याद् मिखाएलहानाद् रहितं तेन विरहितमिति यावत् । Michael इत्यस्य मिखाएल इति देवनागर्यां वर्तनी स्वयं तेनैव विदुषा पुरा सूचिता ।

स्मारं स्मारममुष्य सौम्यवदनं शश्वत्प्रसन्नस्मितं
सौजन्यं सकलं श्रमं ह्यविकलं सारस्वताराधनम् ।
सान्निध्ये विदुषोऽस्य ये खलु मया देशे विदेशे क्षणाः
नीतास्ते मम मानसस्मृतिजले भूयस्तरङ्गायिताः ।।२।।

टि. – मानसमेव मानसरोवरः । तस्य जलं स्मृतिः । तस्मिन् स्मृतिजले हानवर्यस्य सान्निध्ये मया नीताः क्षणाः तरङ्गायिता इति कविवचनम् ।

लाइप्ज़िङ्गनगराद् हनेदरवरः स्नहेन मां नीतवान्
मार्बुर्गं, निशि तत्र भोजनकृते हानेन चामन्त्रितः ।
सा सग्धिश्च तदा सपीतिरपि वा वार्ताश्च तास्ताः कृताः
श्रीहानेन मुदा सहास्यमधुरास्तद् विस्मरेयं कथम् ।।३।।

टि. – २०१२-क्रिस्तुवर्षस्य सितम्बरे मासे भारतीयसांस्कृतिकसम्बन्धपरिषदा लाइप्ज़िग्विश्वविद्यालयेन च पञ्चतन्त्रं विश्वसंस्कृतिश्चेति विषयमवलम्ब्य अन्ताराष्ट्रिया सङ्गोष्ठी समायोजिता । तस्यां भारतपक्षतः अहं समन्वयक आसम् । मार्बुर्गविश्वविद्यालये संस्कृताचार्यः युर्गन् हान्नेदरः (Jürgen Hanneder) मां वाइमारनगरस्थं स्वगृहं मार्बुर्गनगरं च नीतवान् । मार्बुर्गे हानवर्येण सह रात्रिभोजनं मम समजनि । छन्दोऽनुरोधात् हान्नेदरः हनेदर इति कृतः ।

पुण्ये पुण्यपुरेऽथ कफ्फिणमहाकाव्यानुवादाय या
गोष्ठी सप्तदिनात्मिकी समभवद् हानेन चायोजिता ।
श्लोकं श्लोकमसौ निरुक्तिसहितं व्याख्याच्छिवस्वामिनः
पुण्यश्लोकपदं जगाम सहसा हानः स धीमान् कथम् ।।४।।

टि. – गतवर्षे (२०१३तमे क्रिस्त्वब्दे) जनवरीमासे अष्टाविंशतितमाद् दिनात् हानमहोदयेन पुणेनगर्यां पुण्यपत्तनविश्वविद्यालयस्य पालिविभागप्राध्यापकानां श्रीकान्तबहुलकर-महेशदेवकरादीनां सहयोगेन कप्फिणाभ्युदयमहाकाव्यस्य आङ्ग्लभाषानुवादविषये सप्ताहव्यापिनी कार्यशाला समायोजिता । हान-वर्यस्यानुरोधात् कप्फिणाभ्युदयमहाकाव्यस्य प्रथमः सर्गो मया अनूदितः तदधि-कृत्य कार्याशालायाः प्रथमे दिने व्याख्यानमपि प्रादायि ।

तस्मिन्नेव दिने च तत्र नगरे रात्रौ क्वचिद् भोजनं
जातं, यत्र सहास्यलास्यमधुरं हानः सुखेन स्थितः ।
वार्तालापमसौ व्यधाच्च विहसन् वृत्तं निजं स्फोरयन्
प्राप्तो मृत्युमुखं रुजा परिगतः स्वस्थः कथं सोऽभवत् ।।५।।

टि. – तस्मिन्नेव दिने कार्यशालाया उद्घाटनदिने । नगरे पुणे इत्यभिधे पुण्य-पत्तने । भारतेषु पुरा निवसन् असाध्येन व्याधिना अहमाक्रान्तः कथं व्याधिना मुक्त इति विस्मयकरं स्ववृत्तान्तं विहसन् स जगाद ।

श्रावं श्रावममुष्य तत् प्रवचनं मुग्धः किलायं जन-
श्चैतस्मात्तु बिभेति मृत्युरपि हन्तैवं स्वचित्तेऽकरोत् ।
जिष्णुः कालजयी तथा कविरहो धीमानयं वर्तते
कालो नैव कदापि हानिमपि वा हानस्य कर्तुं क्षमः ।।६।।

टि. – मुग्ध इत्यत्र श्लेषः । अयं जनः राधावल्लभः । एवं स्वचित्ते अकरोत् इत्यचिन्तयत् ।

सत्यं हानिरनेन नैव विहिता हानस्य कालेन सा
सेयं तस्य च सद्गतिर्नु महती चास्माकमेव क्षतिः ।
हानस्तिष्ठति सस्मितं त्वभिलपन् सम्बोधयन् पण्डितान्
हानादानपुरस्सरं नु मननं कुर्याम कार्यस्य नः ।।७।।

टि. – अस्माकं भारतीयानाम् ।

लोकानन्दकरो गवेषणपरो लोके विलोपं गतं
लोकानन्दमसौ श्रमादुदधरत् श्रीचन्द्रगोमिप्रथम् ।
आनन्दं वितरन् व्यथां स्वहृदये स्वीयां तथाऽऽच्छादयन्
पीत्वा व्याधिविषं हलाहलसमं नः प्राददाच्चामृतम् ।।८।।

टि. – श्रीचन्द्रगोमिप्रथं चन्द्रगोमिना कविना प्रथा यस्य तद्विरचितमिति यावत्। लोकानन्दं नाम प्राचीनं संस्कृतनाटकं चन्द्रगोमिकृतं संस्कृते विलुप्तं भोटभाषया विदुषा मिखाएलहानेन पुनरनूद्य प्रकाशितम् ।

विद्या सीदति संस्कृताऽथ नितरां भूयो विपत्तिं गता
नूत्ना सा हरिभद्रजातककथा तं त्वाह्वयन्ती स्थिता ।
बौद्धानामपि दर्शनं हतगतिर्जातियमाकस्मिकी
हानिर्हन्त हतस्य चास्य जगतो हाने प्रयाते दिवम् ।।९।।

टि. – हरिभद्रस्य जातकमाला आर्यशूरस्य जातकमालाया अनन्तरं संस्कृतगद्यस्य अत्यन्तं रमणीया कृतिः । नेपालेभ्यः सप्रयासं मातृकाः प्राप्य तस्याः प्रथमं प्रा-माणिकं संस्करणं श्रीहानः समपादयत् ।

सेतुं यो निबबन्ध कर्मनिरतो भावेन चैवान्तरा
योरोपानथ भारतानपि दृढं भावात्मकं स्थायिनम् ।
हानं तं च बुधैरधीतिविदितं शर्मण्यदेशोद्भवं
विद्वांसं प्रतिभारतं बुधवरं नो विस्मरेद् भारतम् ।।१०।।

टि. – योरोपान् भारतान् चान्तरा यः भावेन भावात्मकं सेतुं निबबन्ध तं प्रतिभा – रतं विद्वांसं भारतं भारतवर्षः न विस्मरेत् । अन्तरायोगे द्वितीया । देशवाचिनो भारतशब्दस्य पुंसि नपुंसके च प्रयोगः प्रचलनवशाद् विहितः ।

यावद् वेदपुराणबुद्धवचनैराम्नाय आम्नायते
यावत् संस्कृतवाङमयादविरतं कोशान्मधु च्योतति ।
यावत् सा कविकालिदासमहिता जेगीयते भारती
तावत् कीर्तिकथा तथास्य विदुषो लोके सदा सञ्चरेत् ।।११।।

---

विद्युद्दूतस्य दशमाङकः समाप्तः

---